27/13 64 Bll 10 Linien Die alten Blätter reichen bis Fol. 61a und sind um 1650 geschrieben

Śaradatilaka eine der ältesten Schriften uber die Gebräuche der Tantra Schule von Laksmana Desikendra, Sohn von Krisna Enkel von Vijaya Die Handschrift enthalt neun Paṭala und einen Teil des zehnten Das vollständige Werk umfasst 25 Paṭala Beginnt नित्यानन्दवपुर्निरन्तरगलत्पञ्चाशदर्णैः क्रमाद्व्याप्तं येन चराचरात्मकमिदं शब्दार्थरूपं जगत् । शब्दब्रह्म यदूचिरे सुकृतिनश्चैतन्यमन्तर्गतं तद्वो ऽव्यादनिशं शशाङ्कसदनं वाचामधीशं महः ॥ १ ॥ Sieh Catal Oxon Num 160

1274.

22/10 6 Bll 6 Linien Geschrieben von Ramakavāra im J 1849

Mahamrtyumjayajapavidhi, Anrufung von Rudra als Mrtyumjaya, d i als Besieger des Todes Angeblich aus der Sarada womit jedenfalls das Saradatilaka gemeint ist Dort findet sich dieses Stuck nicht Beginnt अथ शारदोक्तमहामृत्युंजयविधिः । प्रातःस्नानादिनित्यकर्म कृत्वा । आसने उपविश्य । तदादौ भूतशुद्धिं प्राणप्रतिष्ठां च कृत्वा । अद्येत्यादि तिथौ मम वा यजमानस्य सर्वा-

रिष्टनिवृत्तिपूर्वकं सकलाभीष्टसिद्ध्यर्थं आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं श्रीमहामृत्युंजयमन्त्रजपमहं करिष्ये ॥

Die Gebete bewegen sich um den vedischen Vers त्र्यम्बकं यजामहे u. s. w., welcher viermal wiederholt wird, und die einzelnen Wörter und Silben desselben werden in gekünstelter Weise in die Anrufungen mit namas eingeflochten.

1275.

16/6. 6 Bll., 5 Linien. Geschrieben in Devagirimadhye von Rāmaprasada im J. 1862

Mahāmṛityumjayajapavidhi, angeblich aus dem Śāradātilaka. Weicht von der vorhergehenden Handschrift nur in Kleinigkeiten ab.

Schliesst: अथ प्रार्थना ॥ मृत्युंजय महादेव त्राहि मां शरणागतम् । जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः ॥ तावकस्त्वद्गतप्राणस्त्वच्चित्तो ऽहं सदामृड । इति विज्ञाप्य देवेशं जपेन्मृत्युंजयं मनुम् ॥

1276.

22/12. 17 Bll., 10 bis 11 Linien. Geschrieben von Śukadeva, Sohn von Savajī, im J. 1653.

Mṛityumjayavidhānavidhi, enthält ähnliche Vorschriften für die Verehrung von Rudra, ist jedoch mit kabbalistischen Buchstabenformeln überladen. Beginnt: तत्र जपारम्भकालः ॥ मन्त्रारम्भश्च चैत्रे स्याद्बहुदुःखप्रदायकः । वैशाखे रत्नलाभः स्याज्ज्यैष्ठे तु मरणं ध्रुवम् ॥ आषाढे बन्धुनाशः स्यात्पूर्णार्थः श्रावणे तथा । प्रजानाशो भाद्रपदे पुत्रायुर्वर्धनमाश्विने ॥ कार्त्तिके स्वर्णलाभः स्यान्मार्गशीर्षे महोदयः । पौषे धनसमृद्धिः स्यान्माघे मेधाविवर्धनम् । धनं मोक्षश्च फाल्गुने मासानां कीर्तितं फलम् ॥ Citiert werden das Śāradātilaka und das Mohacūḍottara Fol. 9 a. Der eigentliche Gegenstand beginnt auf Fol. 10 a.

Schliesst: न तत्र चौरस्य भयं न दस्योर्न रोगसस्याशनवातभीतिः । उत्पातवायोरपि नात्र शङ्का लक्ष्मीः स्वयं तत्र वसेद्लोला ॥

1277.

22/10. 8 Bll., 7 Linien. Schrift von 1820.

Mṛityumjayajapavidhi, eine ausführlichere Behandlung desselben Gegenstandes. Beginnt: शिवालये देवायतने तीर्थे गृहे वा ब्राह्मणैः सह गन्तव्यम् । तत्र स्नानं कुर्वीत । संध्यादिकं शुचिवस्त्रपरिधानं तिलकं कुर्वीत । तत्र गोमयोपलिप्तभूम्यां चर्ममात्रशोधनं [कार]यित्वा तत्रोपविशति । ततो हस्ते कुशोप[ग्रहं] गृहीत्वा । आचमनं प्राणायामं कृत्वा ॥ अथ प्रयोगः । इहेत्यादि तिथौ श्रीमृत्युंजयप्रीत्यर्थं

पञ्चामृतषोडशोपचारैः पूजा कर्तव्या । अथ अष्टदलमध्ये स्थापयित्वा । इति पूजा । अथ न्यासोपक्रमः । अस्य श्रीत्र्यम्बकमन्त्रस्य वसिष्ठ ऋषिः शिरसि । अनुष्टुप् छन्दो मुखे । मृत्युंजयरुद्रो देवता हृदये । पुरुषार्थपादचतुष्टयार्थे श्रीत्र्यम्बकरुद्रप्रीत्यर्थे न्यासे विनियोगः । ओं त्र्यम्बक अङ्गुष्ठाभ्यां नमः । यजामहे तर्जनीभ्यां नमः । etc

Im Verlauf werden acht Āvaraṇa (Bittgänge) erwähnt, in denen verschiedene als göttliche Wesen betrachtete Dinge und auch Gottheiten angerufen werden

Am Ende des Werkes folgt auf Fol. 8b ein unvollendeter Homavidhi Ein oder mehrere Blätter fehlen am Ende

1278.

15/9 2 Bll, 10 bis 11 Linien. Etwa 1790

Mṛityumjayamantroddhāra, ein kurzer Abriss desselben Gebetes Beginnt: ओं त्र्यम्बकमन्त्रस्य वसिष्ठ ऋषिः । अनुष्टुप् छन्दः । मृत्युंजयमहारुद्रो देवता । मृत्युंजयार्थे जपे विनियोगः । ओं त्र्यम्बक अङ्गुष्ठाभ्यां नमः । ओं यजामहे तर्जनीभ्यां नमः । ओं सुगन्धिं पुष्टिवर्धनं मध्यमाभ्यां नमः । ओं उर्वारुकमिव बन्धनात् अनामिकाभ्यां नमः । ओं मृत्योर्मुक्षीय कनिष्ठिकाभ्यां नमः । ओं मामृतात् करतलपृष्ठाभ्यां नमः । एवं हृदयादि । ओं भूर्भुवः स्वः इत्यनया दिग्बन्धः । ओं रं इत्यग्निप्राकारः । मूलेन व्यापकत्रय कुर्यात् ॥ अथ ध्यानं ॥ ओं चन्द्रार्काग्निविलोचनं स्मितमुखं पद्म (hier durch einen Riss entstellt) द्वयान्तस्थितं मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम् । कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं कान्त्या विश्वविमोहनं पशुपतिं मृत्युंजयं भावये ॥

Schliesst. भूर्भुवःस्वर्भुजङ्गेशसारी जू सर्गवान्भृगुः । आकाशो मनुबिन्द्वाढ्यः प्रणवान्तो मनूत्तमः ।

1279.

21/10. 8 Bll, 6 Linien Etwa 1790.

Kārtavīryayajanakrama, die gehörige Anordnung zur Verehrung des Kārtavīrya, von Raghunandana Śarman Unvollendet Beginnt प्रणम्य परमात्मानं रघुनन्दनशर्मणा । श्रीकार्तवीर्यदेवस्य लिख्यते यजनक्रमः ॥ तत्रादौ मासविचारः । वैशाखश्रावणाश्विनकार्त्तिकमार्गशीर्षपौषमाघफाल्गुनाः शुभा नेतरे । श्रेष्ठमासेष्वपि शुक्लपक्षः । प्रतिपदमारभ्य पौर्णमासः शुभः ।

1280.

28/10. 12 Bll., 8 Linien. Etwa 1820.

Kārtavīryārjunakalpa, das Ceremoniell des Kārtavīryārjuna. Besprochen werden hauptsächlich die wundervollen Wirkungen einer Zauberformel. In zwei Abteilungen von je 57 und 164 Versen. Beginnt: वन्दे शंभुं सदानन्दं शंकरं करुणापरम् । चन्द्रार्धचूडमिन्द्राद्यैर्वन्दितं नन्दिवाहनम् ॥ १ ॥ रजताद्रिप्रतीकाशं रजताद्रिनिवासिनम् । पप्रच्छ शांभवी शंभुं गिरिशं गिरिनन्दिनी ॥ २ ॥ श्रीदेव्युवाच ॥ देवदेव महादेव देवारिबलसूदन । देववर्धन देवेन्द्रवन्दितेन्दुशिखामणे ॥ ३ ॥ पृच्छे भवन्तं भगवतः कार्तवीर्यस्य भूपतेः । माहात्म्यं मन्त्रराजस्य विस्तरेण ब्रवीतु मे ॥ ४ ॥ कार्तवीर्यमनोर्देव विधानं वक्तुमर्हसि । सरहस्यं महामुख्यं श्रोतुमिच्छामि विस्तरात् ॥ ५ ॥ Fol १२ fehlt

1281.

22/11. 9 Bll., 11 Linien. Geschrieben im J. 1747.

Kārtavīryārjunakavaca, ein Schutzgebet an Kārtavīryārjuna, aus dem Uḍḍāmaratantra. 165 Verse Beginnt: ओं श्रीचिद्घनानन्दनाथो जयति ॥ ओं अस्य श्रीकार्तवीर्यार्जुनमन्त्रस्य दत्तात्रेय ऋषिरनुष्टुप् छन्दः श्रीकार्तवीर्यार्जुनो देवता आं बीजं क्रीं शक्तिर्यथोक्तफलप्राप्त्यर्थं श्रीकार्तवीर्यार्जुनप्रीत्यर्थे जपे विनियोगः । etc. अव्यात्सर्वभयात्प्रभाकरनिभः प्रोद्योतनोद्योतितः स्वर्णस्रवपरिवीतकंधरधरो रक्तांशुकोष्णीषवान् । नानारत्नविभूषितः करसहस्रार्धात्तबाणासनो बाणार्धसहस्रवाङ्करनिशं भूवल्लभो नः प्रभुः ॥ १ ॥ अन्यच्च ॥ सप्तद्वीपैकनाथः सवितृसमरुचिः सर्वदुष्टान्तको नः पायाद्व्यायताक्षो रथवरनिलयः स्थूलकायो ऽथ भीमः । चापात्तेषुस्त्रिलोकी करधृतधनुषो निस्वनैस्त्रासयानः श्रीमान् श्रीकार्तवीर्यो ऽखिलनृपतिनतांघ्रयम्बुजाचप्रकारी ॥ २ ॥ श्रीदेव्युवाच ॥ देवाधिदेव सर्वज्ञ सर्वलोकहिते रत । केन रक्षा भवेन्नृणां भीतानां विविधापदि ॥ १ ॥ राजचौरादिपीडासु शस्त्राग्निविषपातने । मारीदुःस्वप्नपीडासु ग्रहरोगभयेषु च ॥ २ ॥ ज्वरापस्मारपीडासु सिंहव्याघ्रनिपातते । राक्षसासुरवेतालपिशाचप्रेतनाशने ॥ ३ ॥ महाभये महानाशे महानावि गते ऽर्णवे । महामृत्युभये घोरे महाकलहपातने ॥ ४ ॥ केनोपायेन शान्तिः स्यात्साधकानां महेश्वर । अनष्टद्रव्यरक्षा च नष्टस्य पुनरागमः ॥ ५ ॥ सर्वाकर्षणसंक्षोभसर्वसंवननं (sarvasammanabanam MS.) तथा । भवत्यभीष्टं जभृणां केनं तद्वद मे शिव ॥ ६ ॥ ईश्वर उवाच ॥ शृणु गुह्यतमं

देवि गोपनीय प्रयत्नतः । अवाच्यमपि वक्ष्यामि तव लोकहिताय वै ॥ ७ ॥ कवच कार्तवीर्यस्य साङ्गावरणक क्रमात् । स्वमूर्तिशक्तिमन्त्रौघ सजपध्यानपूर्वकम् ॥ ८ ॥

Schliesst कार्तवीर्यस्य कवचं तदुक्तं वै मया तव ॥ १६२ ॥ येन सरक्षितो देवि कालेनापि न जीर्यति । तस्मात्सर्वप्रयत्नेन कवचं धारयेत्सुधीः । कार्तवीर्यः खलद्वेषी कृतवीर्यसुतो बली ॥ १६३ ॥ सहस्रबाहुः शत्रुघ्नो रक्तवासा धनुर्धरः । रक्तगन्धो रक्तमाल्यो राजा स्मर्तुरभीष्टदः ॥ १६४ ॥ द्वादशैतानि नामानि कार्तवीर्यस्य यः पठेत् । सपदस्तस्य जायन्ते जनास्तस्य (jātas tasya MS) वशे सदा ॥ १६५ ॥

1282.

19/8 11 Bll, 8 Linien Geschrieben von dem Bhikṣu Viṣṇugiri im J 1707

Kārtavīryārjunakavaca Eine genauere Abschrift Das erste Blatt fehlt Das zweite Blatt beginnt in der zweiten Hälfte von Vers 9 भास्वद्ध्वजपताकाढ्ये तुरगायुतभूषिते ॥ ९ ॥ महासवर्तकाम्भोदभीमरावविराविणि । समुद्धूतमहाछत्त्रवितानितवियत्पथि ॥ १० ॥

1283.

27/12 7 Bll, 10 Linien Etwa 1790

Kārtavīryastavarāja, ein Lobgedicht auf Kārtavīryārjuna, aus dem Uḍḍāmareśvaratantra 133 Verse Beginnt रक्तस्रगम्बरविभूषणकुण्डलाढ्य चापासिसायकगदाशनिचक्रयूथैः । सशोभितायुतसहस्रकर गुणाब्धि लोकैकनाथमनिश मनसा स्मरामि ॥ १ ॥ उद्यद्दिवाकरनिभ कमलायताक्ष केयूरनूपुरकिरीटधर नरेशम् । रक्षःपिशाचभयनाशनमादिदेव श्रीकार्तवीर्यमनिश हृदि भावयामि ॥ २ ॥ मेरुपृष्ठसुखासीन देवदेव जगद्गुरुम् । त्रिलोचन नीलकण्ठ जटामुकुटमण्डितम् ॥ ३ ॥ स्कन्दादिसहित शान्त सर्वभूतहिते रतम् । प्रणम्य दण्डवद्भूमौ लोकानुग्रहकाम्यया ॥ ४ ॥ प्रीत्युत्फुल्लानना देवी महोत्कण्ठाकुलेक्षणा । कलावन्तजनावासमुवाच गिरिजा शिवम् ॥ ५ ॥ श्रीपार्वत्युवाच ॥ देवदेव महादेव लोकानुग्रहकातर । चन्द्रशेखर भस्माङ्ग फणिराजविभूषण ॥ ६ ॥ सर्वशास्त्रपुराणानि श्रुतय' स्मृतयस्तथा । विप्रधर्मा राजधर्मा वैश्यधर्मास्तथैव च । शूद्रधर्मास्तथा स्त्रीणा सकराणामपि स्फुटम् ॥ ७ ॥ बालानामपि यूना च वृद्धाना चापि त्वया विभो । धर्माः प्रोक्ता बटूना च गृहस्थाना तथैव च ॥ ८ ॥ वनस्थाना यतीना च विधवाविधुरात्मनाम् । सर्वे धर्मा' श्रुता

ज्ञातास्त्वत्प्रसादान्महेश्वर ॥ ९ ॥ इदानीं श्रुतिसंपन्न श्रोतुमेकं त्वदा-श्रयतः । ममोत्कण्ठाकुलं चेतस्तन्मे वक्तुं त्वमर्हसि ॥ १० ॥

Schliesst: रहस्यं तव राजाख्यं मया ते प्रकटीकृतम् । गोपनीयं त्वया सम्यक् निधानमिव पार्वति ॥ १३० ॥ उद्यद्दिवानाथसहस्र-कान्तिं रथस्थमिष्वासनबाणहस्तम् । रक्षोभयघ्नं जलजायताक्षं नमामि देवाधिपपूजितांघ्रिम् ॥ १३१ ॥ दशास्यदर्पघ्नमतिप्रसन्नं रक्ताम्बरं हाटकमालिकण्ठं । सहस्रबाहुं जगतीपतीशं चक्रावतारं प्रणमामि विष्णुम् ॥ १३२ ॥ माहिष्मतीनाथमनाथनाथं राजेन्द्रपूज्यं शशिवंशकेतुम् । रक्ताङ्गरागं भयरोगवैद्यं श्रीकार्तवीर्यं हृदि भावयामि ॥ १३३ ॥

1284.

15/10. 4 Bll., 9 Linien. Geschrieben von Raghunātha Jyautiṣa im J. 1839.

Indrākṣīstotra, ein Loblied auf Indrākṣī in 16 Versen, von Indra vorgetragen. Indrākṣī ist ein Name von Durgā. Beginnt: ओं अस्य श्रीइन्द्राक्षीस्तोत्रमन्त्रस्य पुरंदर ऋषिः । इन्द्रो देवता । अनुष्टुप्छन्दः । महालक्ष्मीर्बीजम् । सूर्यस्तत्त्वम् । भुवनेश्वरी शक्तिः । भवानी कीलकम् । मम सकलकामनासिद्ध्यर्थे जपे विनियोगः ॥ etc.

Der Hymnus beginnt: इन्द्र उवाच ॥ इन्द्राक्षी नाम सा देवी दैवतैः समुदाहृता । गौरी शाकंभरी देवी दुर्गानाम्नेति विश्रुता ॥ ५ ॥ कात्यायनी महादेवी चन्द्रघण्टा महातपाः । सावित्री सा च गायत्री ब्रह्माणी ब्रह्मवादिनी ॥ ६ ॥ नारायणी भद्रकाली रुद्राणी कृष्ण-पिङ्गला । अग्निज्वाला रौद्रमुखी कालरात्री तपस्विनी ॥ ७ ॥ मेघस्वना सहस्राक्षी विष्णुमाया जलोदरी । महोदरी मुक्तकेशी घोररूपा महाबला ॥ ८ ॥

1285.

23/15. 3 Bll., 10 Linien. Etwa 1870.

Indrākṣīstotra. Derselbe Text mit geringen Abweichungen und Zusätzen.

Schliesst: सर्वरोगप्रशमनं सर्वदुःखविनाशनम् । अन्ते मुक्ति-मवाप्नोति सत्यं सत्यं न संशयः ॥ १५ ॥

1286.

26/12. 4 Bll., 11 bis 12 Linien. Etwa 1700.

1) *Kālikādipadānavidhi* aus dem Brahmayāmala 14 Verse. Beginnt: भैरव उवाच ॥ कालिकाया महाविद्या कौणपेश्वरराधिता ।

दीपं दत्त्वा फलं ज्ञात्वा बीजं च प्रथमोद्भृतम् ॥ १ ॥ सिन्दूरेण हतं यन्त्रं मूलेनावेष्टितं ततः । तस्योपरि घृतं दीपं दीपाग्रे दीपिनीं यजेत् ॥ २ ॥ विद्याः कमला काली वाग्भवं भुवनेश्वरी । एषा तु दीपिनी विद्या कालिका वश्यकारिणी ॥ ३ ॥ सुवर्णे रजते ताम्रे कांस्ये लोहे च मृन्मये । यथालाभं तथा कुर्यान्निशीथे मुक्तकुन्तल ॥ ४ ॥

2) *Dakṣiṇakālīdīpapaṭala* aus der Agastisamhitā. 11 Verse Beginnt अथातिसाधने दीपं दक्षिणाया मनोहरम् । भार्गवेण हतं दीपं भर्गस्याचापुरस्कृतम् ॥ १ ॥ नानारोगार्तिहरणं नानाक्लेशनिवारणम् । महाशत्रुभये प्राप्ते प्राप्तये प्राणसंकटे ॥ २ ॥ दत्त्वा दीपं प्रयत्नेन कालिकाकल्पभूरुहम् । मूलं जप्त्वा हविष्येण दिवसे अयुतार्धकम् ॥ ३ ॥ रात्रौ च प्रहरे ऽतीते ततो दीपं प्रकल्पयेत् । न्यासादिकं ततः कुर्यात्षोढा कवचसंयुतम् ॥ ४ ॥

3) *Asitadīpadāna* aus dem Kālīkulasarvasva 16 Verse Beginnt देव्युवाच ॥ असितादीपदानस्य विधिं ब्रूहि ममाग्रतः । यदि ते वल्लभा देव सर्वलोकजनेश्वर ॥ १ ॥ शिव उवाच ॥ गुह्याद्गुह्यतरं देवि यत्पृष्टं प्राणवल्लभे । न कस्यापि मया ख्यातं तव प्रीत्या वदामि तत् ॥ २ ॥ शान्तिवश्यस्तम्भनानि द्वेषोच्चाटने ततः । मरणान्तानि [तानि] षट्प्रकाराणि कर्म च ॥ ३ ॥ शान्त्यै रौप्यमयं पात्रं वश्ये मायमयं स्मृतम् । स्तम्भने लोहसंभूतं विद्वेषे त्रपुसंभवम् ॥ ४ ॥

4) *Śāntistava* tantrik in 43 Versen. Beginnt जयन्तु देव्यो हरपादपङ्कजं प्रसन्नवामामृतमोदद्दायकम् । अनन्तसिद्धान्तमतिप्रकाशकं नमामि चाष्टाष्टकयोगिनीगणम् ॥ १ ॥ योगिनीचक्रमध्यस्थं मातृमण्डलवेष्टितम् । नमामि शिरसा नाथं भैरवं भैरवीप्रियम् ॥ २ ॥ अनादिघोरसंसारध्वान्तविध्वंसहेतवे । नमः श्रीदेवनाथाय भवापथविधायिने ॥ ३ ॥ आपदो दुरितं रोगाः समयाचारलङ्घनात् । सर्वं च मे व्यपोहन्तु दिव्यचक्रस्य मेलनात् ॥ ४ ॥ आयुरारोग्यमैश्वर्यं कीर्तिर्लाभः सुखं जयः । लक्ष्मीर्मनोरमा चास्तु पान्तु मां सर्वदेवताः ॥ ५ ॥ सपूजकानां प्रतिपालकानां जितेन्द्रियाणां च तपोधनानाम् । देशस्य राष्ट्रस्य कुलस्य राज्ञः करोतु शान्तिं भगवान्कुलेशः ॥ ६ ॥

Schliesst नित्यमेतत्पठेत्सूक्तं पुत्रान्ते साधकस्तु यः । शान्तिदं सर्वपापानां सर्वपापनिकृन्तनम् ॥ ४२ ॥ आधयस्तस्य नश्यन्ति जीवेद्दृष्टशतं सुखी । विहृत्य भुवनैश्वर्ये सो ऽमरत्वमवाप्नुयात् ॥ ४३ ॥

1287.

16/10. 24 Bll., 7 bis 8 Linien. Schrift von 1669.

Kālikāsahasranāmastotra. Nach dem Kolophon aus dem Rudrayāmala, während in Nummer *1290, 1* als *Quelle* das Kālikātantra angegeben ist. Fol. 1 fehlt. Fol. 2 beginnt: आगतो ऽसि किमर्थं त्वं कथयस्व च तत्त्वतः। तस्य तद्वचनं श्रुत्वा रूपा प्रस्फुरितेन च ॥५॥

1288.

33/15. 15 Bll, 12 Linien. Abschrift von 1808.

Kālisahasranāman aus der Mahākālasaṃhitā. *Tausend Epitheta der Kālī, welche sammtlich mit dem Buchstaben k anfangen.* Beginnt: यथा दिव्यामृतैर्दिव्याः प्रसन्नाः चणमाचतः। तथानेन महाकाली प्रसन्ना पाठमाचतः ॥ १ ॥ कथ्यते नामसाहस्रं सावधानमनाः शृणु । सर्वसाम्राज्यमेधाख्यं नामसाहस्रकस्य च ॥ २ ॥ महाकाल ऋषिः प्रोक्त उष्णिक् छन्दः प्रकीर्तितम् । देवता दक्षिणा काली माया बीजं प्रकीर्तितम् ॥ ३ ॥

Schliesst: इति श्रीमहादिनाथविरचितायां महाकालसंहितायां कालीकालसंवादे सुन्दरीशक्तिदानाख्यं कालीस्वरूपं सहस्रनामस्तोत्रं संपूर्णम् ॥

1289.

19/12. 13 Bll., 10 Linien. Abschrift von etwa 1750.

Kālikāsahasranāman aus dem Kālikākulasarvasva, tausend Namen, das heisst tausend Attribute der Kālī, ohne alle Kunst zusammengereiht. Das erste Blatt fehlt. Das zweite beginnt: यै॰३८ ओं छशाङ्ग्यै॰३९ ओं कुलिशाङ्ग्यै॰४० ओं क्लींकार्यै॰४१ ओं कमलाकलायै॰४२ ओं करालास्यायै नमः ४३ ओं कराल्यै नमः ४४ ओं कुलकान्तायै॰४५ ओं अपराजितायै ४६ ओं उग्रायै ४७

Schliesst: शिव उवाच ॥ इति श्रीकालिकानाम्नां सहस्रं शक्तिभाषितम् । गुह्याद्गुह्यतरं साक्षान्महापातकनाशनम् ॥ १ ॥ पूजाकाले निशीथे च संध्ययोरुभयोरपि । लभते गाणपत्यं स यः पठेत्साधकोत्तमः ॥ २ ॥ यः पठेत्पाठयेद्वापि शृणोति श्रावयेदपि । सर्वपापविनिर्मुक्तः स याति कालिकापदम् ॥ ३ ॥ अश्रद्धया श्रद्धया वा यः कश्चिन्मानवः पठेत् । दुर्गाद्दुर्गतरं तीर्त्वा स याति परमां गतिम् ॥ ४ ॥ वन्ध्या वा काकवन्ध्या वा मृतापत्या च याङ्गना । श्रुत्वा स्तोत्रमिदं पुत्राँल्लभते चिरजीविनः ॥ ५ ॥ यं यं कामयते कामं पठनात्स्तोत्रमुत्तमम् । देवीवरप्रसादेन तं तं प्राप्नोति नित्यशः ॥ ६ ॥

इति श्रीकालिकाकुलसर्वस्वे शिवपरशुरामसंवादे कालिकासहस्रनामस्तोत्रं संपूर्णम् ॥

1290.

18/10 57 Bll meistenteils 11, seltener 7, 9, 10, 12 Linien Etwa 1750

Kālikavaca oder *Kālikākavaca*, eine Sammlung von Schutzgebeten an Kalı Auszuge aus verschiedenen Tantra Die Handschrift hat keinen Gesammtnamen Das letzte Stuck bricht im vierundzwanzigsten Verse ab

1) *Mahākālısahasranāman* tausend Namen der Kalı, aus dem Kalıkātantra Zwiegespräch zwischen Śaṅkara und Paraśurāma 230 Verse Beginnt श्रीशिव उवाच ॥ कथितो ऽयं महामन्त्र. सर्वमन्त्रोत्तमोत्तमः । यमासाद्य मया प्राप्तमैश्वर्यपदमुत्तमम् ॥ १ ॥ सपूज्य परया भक्त्या यथोक्तविधिना भवान् । क्रियतामर्चनं भक्त्या त्रैलोक्यविजिगीषया ॥ २ ॥ श्रीपरशुराम उवाच ॥ प्रसन्नो यदि मे देवः परमेशः पुरातन. । रहस्य परम देव्याः कृपया कथय प्रभो ॥ ३ ॥ विनार्चन विना होमं विना न्यासं विना बलिम् । विना गन्धं विना पुष्प विना नित्योदितां क्रियाम् ॥ ४ ॥ प्राणायामं विना ध्यान विना भूतविशोधन । विना जपं विना दानं यथा काली प्रसीदति ॥ ५ ॥ श्रीमहादेव उवाच ॥ पृष्टं त्वयोत्तम प्राज्ञ भृगुवंशसमुद्भव । भक्तानामपि भक्तो ऽसि त्वमेव साधयिष्यसि ॥ ६ ॥ देवी दानवकोटिघ्नी लीलया रुधिरप्रियाम् । सदा स्तोत्रप्रियामुग्रां कामकौतुकलालसाम् ॥ ७ ॥ सर्वदानन्दहृदयामासवासक्तमानसाम् । माध्वीकमत्स्यमांसानुरागिणी रुधिरप्रियाम् ॥ ८ ॥ श्मशानवासिनी प्रेतगणनृत्यमहोत्सवाम् । योगप्रभावां योगेशी योगीन्द्रहृदयस्थिताम् ॥ ९ ॥ तामुग्रकालिकां राम प्रसादयितुमर्हसि । तस्याः स्तोत्र महापुण्यं स्वयं काल्या प्रकाशितम् ॥ १० ॥ तव तत्कथयिष्यामि श्रुत्वा वत्सावधारय । गोपनीयं प्रयत्नेन पठनीयं परात्परम् ॥ ११ ॥

Die tausend Namen beginnen nach Vers 17 ओं अस्य श्रीदक्षिणकालीसहस्रनामस्तोत्रस्य महाकालभैरव ऋषिरनुष्टुप् छन्दः श्मशानकालिका देवता धर्मार्थकाममोक्षार्थे जपे विनियोगः ॥ ओं नमः कालिकायै ॥ ओं श्मशानकालिका काली भद्रकाली कपालिनी । गुह्यकाली महाकाली कुरुकुल्ला विरोधिनी ॥ १८ ॥

2) Fol 18b *Dakṣinakālikākavaca*, angeblich aus dem Vīrabhadratantra 14 Verse Beginnt वीरभद्र उवाच ॥ ओं कालीकवचस्यास्य ऋषिर्भैरव उच्यते । छन्दो ऽनुष्टुप् समाख्यातं देवी दक्षिणकालिका । शक्तिर्दाविंशवीजानि विनियोगश्च रक्षणे ॥ १ ॥ शिरसि नयनभाले भ्रूयुगे कर्णगण्डे वदनरदनजिह्वास्कन्धदेशे गले च ।

भुजहृदयसपार्श्वे पृष्ठिनाभौ च लिङ्गे कटियुगकरपादे सर्वतो मन्त्रवर्णान् ॥ २ ॥

3) Fol. 19 b. *Dakṣiṇakālikākavaca* aus dem Bhairavatantra. 36 Verse. Beginnt: अथ जगन्मङ्गलम् ॥ भैरव्युवाच ॥ कालीपूजा श्रुता नाथ भावाश्च विविधाः प्रभो । इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितम् ॥ १ ॥ त्वमेव शरणं नाथ त्राहि मां दुःखसंकटात् ॥ भैरव उवाच ॥ रहस्यं शृणु वक्ष्यामि भैरवि प्राणदुर्लभे (lies °वल्लभे) ॥ २ ॥ श्रीजगन्मङ्गलं नाम कवचं मन्त्रविग्रहम् । पठित्वा धारयित्वा च त्रैलोक्यं मोहयेत्क्षणात् ॥ ३ ॥

4) Fol. 21 b. *Kālīstotra.* $3^1/_2$ Verse. Beginnt: नमामि सर्वजननीं मुण्डमालाविभूषिताम् । सर्वसिद्धिप्रदां नित्यां शिवरूपशवस्थिताम् ॥ १ ॥ महाकालयुतां घोरां कालीं जगत्स्वरूपिणीम् (जाग्रत्स्व° MS.) दक्षिणां कालिकां दिव्यां तां नमामि विभूतये ॥ २ ॥

5) Fol. 22 a. *Śyāmalāstotra* in 31 Upajāti-Versen. Beginnt: नमामि ते देवि पदारविन्दं त्वामाश्रयामि प्रणमामि नित्यम् । ध्येयामि गेयामि वदामि नित्यमेवं कुरु त्वं मम चित्तवृत्तिम् ॥ १ ॥ सीमन्तिनीकाञ्चनकान्तिनम्रा कादम्बरीघूर्णितनेत्रपद्मा । कदम्बमालाञ्चितकेशपाशा कलावती कौलिकचक्रमध्ये ॥ २ ॥ कन्दर्पदर्पादरदीर्घनेत्रा कुमुद्वतीबान्धवचारुनेत्रा कलाकलापा कलहंसलापा । कलावती कामकलाभिलापा ॥ ३ ॥

6) Fol. 24 b. *Kālikavaca Vajrapañjarākhya* aus dem Rudrayāmala. 10 Verse. Einleitungsvers: सिंहादुत्थाय कोपाद्दडडडडडद्दावमानाङ्गवान्नी दैत्यानां दिव्यशस्त्रैस्तुटुटुटुटुटुटत्त्रोटयन्ती शिरांसि । तेषां रक्तं पिबन्ती घुघुटघुटघुटत्स्नेपयन्ती पिशाचांस्तृप्ता तृप्ता हसन्ती खखदखदखदच्छाम्भवी नः पुनातु ॥ १ ॥ Der eigentliche Anfang ist: पार्वत्युवाच ॥ अधुना देवदेवेश कवचं वज्रपञ्जरम् । कालीकृपाकटाक्षोर्मि कवचं कथय प्रभो ॥ २ ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि तवाग्रे कवचोत्तरम् । यस्मिन्ज्ञाते भवत्येव श्रीकालीतनयो नरः ॥ ३ ॥ विनामुना न सिद्धा स्यात्कालिका दक्षिणा परा । अतः कवचिना भाव्यं साधकेन्द्रेण सिद्धये ॥ ४ ॥

7) Fol. 26 a. *Trailokyamohana Kālikākavaca* aus dem Rudrayāmala. $61^1/_2$ Verse. Beginnt: देव्युवाच ॥ देवदेव महादेव संसारप्रीतिकारकः । महाविद्येश्वरी विद्यां मह्यं त्वं कथय प्रभो ॥ १ ॥ श्रीशिव उवाच ॥ शृणु देवि महाविद्यां सर्वविद्योत्तमोत्तमाम् ।

सर्वेश्वरी महाविद्या सर्वदेवविराजिता ॥ २ ॥ तस्याः कटाक्षमात्रेण त्रैलोक्यविजयी हरः । बभूव कमलानाथो विभुर्ब्रह्मा प्रजापतिः ॥ ३ ॥

8) Fol 30b *Trailokyamohana Kavaca* aus dem Kālikāpurāna Beginnt श्री नमः कालिकायै । श्री नमः सर्वसिद्धियोगिनीभ्यः । श्रीं नम. सर्वसिद्धिमातृभ्य. । श्री नम उदितोदितानन्दनाथै । श्री नमः सकलकुलचन्द्रिकायै । श्री नमो भगवत्यै चण्डमालिन्यै नमो नमः ॥

9) Fol 31a *Trailokyamohana Kavaca* aus dem Rudrayamala 34 Verse Beginnt श्रीदेव्युवाच ॥ भगवन्ब्रूहि कवच भुक्तिमुक्तिफलप्रदम् । त्रैलोक्यमोहनं नाम कृपया मे जगद्गुरो ॥ १ ॥ शिव उवाच ॥ शृणु देवि वरारोहे कवच परमाद्भुतम् । यद्धृत्वा पठनाद्ब्रह्मा सृष्टिकर्ताभवत्प्रभु' ॥ २ ॥ कृष्णो दूर्वादलश्यामो देवकीगर्भसंभवः । हृत्पद्मे कालिका ध्यात्वा ततः कृष्णत्वमाप्नुयात् ॥ ३ ॥ कालिका दक्षिणा ध्यात्वा ऋद्धिबुद्धिफलप्रदाम् । सर्वाः श्यामा भवन्त्येता जनार्दनविभूतयः ॥ ४ ॥

10) Fol 33a *Kalikavaca* aus dem Uttaratantra des Rudrayamala 75 Verse Beginnt कैलासशिखरारूढं भैरव चन्द्रशेखरम् । वच.स्थले समासीना भैरवी परिपृच्छति ॥ १ ॥ भैरव्युवाच ॥ देवेश परमेशान लोकानुग्रहकारक । कवच सूचित पूर्वं कथयस्व मयि प्रभो ॥ २ ॥ यदि मे महती प्रीतिस्तवास्ति कुलभैरव । कवच कालिकादेव्याः कथयस्वानुकम्पया ॥ ३ ॥ भैरव उवाच ॥ अप्रकाश्यमिद देवि नरलोके विशेषतः । लक्षवार वारितापि स्त्रीस्वभावादि पृच्छसि ॥ ४ ॥

11) Fol 38b *Kavaca Jagadrakṣākara* aus dem Kālikārahasya 67 Verse Beginnt श्रीपार्वत्युवाच ॥ भवद्.खमहौषिमा सतप्ता करुणार्णवम् । याचे त्वामहमीशैक त्रातुमर्हसि वाग्भवैः ॥ १ ॥ कथित कालिकादेव्याः कवचं कामदं महत् । रहस्य कवच ब्रूहि कस्मैचिन्न यदीरितम् ॥ २ ॥ प्रयोगसंघैर्भवता साधको विमुखीकृत' । साधनात्तदिदानीं मे प्रत्यक्षीकरणं वद ॥ ३ ॥

12) Fol 43b *Kālikākavaca* aus dem Kalikākalpa $21\frac{1}{2}$ Verse Beginnt महाकालभैरव उवाच ॥ कालिका कमला काली कामसिद्धा महोदरी । प्रत्यक्षा भव चामुण्डे भक्त्या कवचपाठतः ॥ १ ॥ कुसुम्भकुसुमा शीर्षं पायात्कमललोचना । ललाटं पातु चामुण्डा कण्ठं

रचतु कालिका ॥ २ ॥ ऊरू मे पातु लीलाची कामस्थानं शि-वाङ्गना । जङ्घायुग्मं भद्रकाली पादाग्रं पातु भीषणा ॥ ३ ॥

13) Fol. 45 a. *Kālikākavaca* aus dem Kālikākulāmṛita. 30 Verse. Beginnt: कैलासशिखरासीनं प्रणिपत्य जगद्गुरुम् । पप्रच्छ पार्वती नाथं विनयान्नम्रकंधरा ॥ १ ॥ श्रीदेव्युवाच ॥ देवदेव पर ब्रह्मन् संसारार्णवतारक । केन सिद्धिर्भवेच्छीघ्रं कालिकामन्त्र (lies का-लिकादेव्या) उत्तमा ॥ २ ॥ श्रीभैरव उवाच ॥ शृणु देवि प्रवच्यामि कालीकवचमुत्तमम् । यस्य संकीर्तनाच्छीघ्रं मन्त्रसिद्धिः प्रजायते ॥ ३ ॥ अपुत्री लभते पुत्रं दरिद्रो लभते धनम् । गृहचौरनृपाणां च भयं नैवात्र विद्यते ॥ ४ ॥ शिरोदेशे गले वापि करे वामे च दक्षिणे । धारणात्सर्वसिद्धिः स्याद्भूर्जे स्वर्णे त्रिलोहके ॥ ५ ॥

14) Fol. 47 a. *Kālikākavaca* aus dem Kālikākulasāra. 14 Verse. Beginnt: ओं नमः सिद्धकाली शिरः पातु ललाटं पातु दक्षिणा । काली मुखं सदा पातु कपालिनी तु चक्षुषी ॥ १ ॥ कुल्ला गण्डौ सदा पातु दशनौ कुरुकुल्लुका । विरोधिन्यधरौ पातु चिबुकं विप्रचित्तिका ॥ २ ॥ श्मशानवासिनी कर्णौ नासां पातु दिगम्बरी । अट्टहासा पातु कण्ठमंसौ पातु सुरेश्वरी ॥ ३ ॥

15) Fol. 48 a. *Kālikākavaca* aus der Śāmbhavīsaṃhitā. 20 Verse. Beginnt: शांभव्युवाच ॥ यः पठेत्प्रातरुत्थाय मम ध्यान-परो नरः । कवचं तु तथा पूर्वं स्वयंवक्त्राद्विनिःसृतम् ॥ १ ॥ तच्छृणुष्व जगत्स्वामिन्वदामि प्रियभावतः । ओं पूर्वे दक्षिणे भागे पश्चिमे चोत्तरे तथा ॥ २ ॥ दक्षिणा कालिका पातु खड्गमुण्डधरा सदा । आग्नेय्यां पातु नैर्ऋत्यां वायव्यां रुद्रगोचरे ॥ ३ ॥

16) Fol. 49 b. *Kālikākavaca Āpaduddhāraṇa* aus dem Rudrayāmala 16 Verse. Beginnt: देव्युवाच ॥ देवदेव जगन्नाथ भक्तानुग्रहकारक । सर्वापद्भ्यः समाप्नोति परित्राणं कथं नरः ॥ १ ॥ ईश्वर उवाच ॥ शृणु देवि प्रवच्यामि गुह्याद्गुह्यतरं परम् । आपदु-द्धारणं नाम कवचं परमाद्भुतम् ॥ २ ॥ शतमष्टोत्तरं चैव जप्त्वा ध्यात्वा च कालिकाम् । इन्द्रजिद्धिंसनान्मुक्तः पुरा देवि शचीपतिः ॥ ३ ॥ भैरवो ऽस्य ऋषिश्छन्दो गायत्री देवता प्रभुः । कालिका विनि-योगो ऽस्य सर्वापद्विनिवारणे ॥ ४ ॥

17) Fol. 50 b. *Kālikākavaca* aus dem Uttaratantra. 20 Verse. Beginnt: कैलासशिखरे रम्ये नानाचित्रविचित्रिते । कालिकां परि-पप्रच्छ भैरवो लोकनायकः ॥ १ ॥ श्रीमद्भैरव उवाच ॥ कालिकाया

महाविद्या कथिता भुवि दुर्लभा । तथापि हृदये शल्यमस्ति देवि कृपा कुरु ॥ २ ॥ कवचं तु महादेवि कथयस्वानुकम्पया । यदि नो कथ्यते मातर्विमुञ्चामि कलेवरम् ॥ ३ ॥ देव्युवाच ॥ शङ्कापि जायते वत्स तव स्नेहात्प्रकाश्यते । सर्वतन्त्रेषु गोप्यं हि कालीकुले प्रकाशितम् ॥ ४ ॥

18) Fol 52a *Śapamocana* aus dem Rudrayamala 13 Verse Beginnt दक्षिणा कालिका देवी तां मे कथय शंकर । किंरूपा सा किमाचारा कथं सेव्या किमात्मिका ॥ १ ॥ एवं संप्रार्थितो देव पुनः प्राह मुनीश्वरम् । साधु साधु महाप्राज्ञ सम्यक्त्वं पृष्टवानसि ॥ २ ॥ अहं ते कथयिष्यामि पुत्र सावहितो भव । सच्चिदानन्दरूपा या चिद्वाक्तिरिति गीयते ॥ ३ ॥ या स्थिता व्याप्य सकलं विद्धि तां दक्षिणां मुने । उत्तीर्य तन्यते स्वष्टिस्तस्यां च परिलीयते ॥ ४ ॥

19) Fol 53a *Kālīkavaca* einem Virupakṣa zugeschrieben 50 Verse Sieh Nummer 1291

20) Fol 56a bis 57b Fragment Beginnt देव्युवाच ॥ देवदेव महाबाहो भक्तानां सुखवर्धन । केन सिद्धिं ददात्याशु काली त्रैलोक्यमोहिनी ॥ १ ॥ तन्मे वद दयापार साधकाभीष्टसिद्धये । कृपां कुरु जगन्नाथ वद वेदविदां वर ॥ २ ॥ भैरव उवाच ॥ गोपनीयं प्रयत्नेन तत्त्वात्तत्त्वं परात्परम् । द्रुतसिद्धिकरं सत्यं किमहो कथयाम्यहम् ॥ ३ ॥ महाकालमहं वन्दे सर्वसिद्धिप्रदायकम् । देवदानवगन्धर्वकिन्नरपरिसेवितम् ॥ ४ ॥ कवचं तस्य देवस्य पठनाद्घोरदक्षिणा । सत्यं भवति सांनिध्ये कवचस्तवनान्तरात् ॥ ५ ॥

1291.

$16^1/_2/8$ 5 Bll 8 bis 9 Linien Etwa 1750

Kālīkavaca einem Virūpakṣa (d. i. Śiva) zugeschrieben 50 Verse Beginnt श्रीविरूपाक्ष उवाच ॥ नमामि गुरुमघोभ्य मन्त्रशक्तिसमन्वितम् । प्रसन्न ज्ञानविज्ञानहेतुं बुद्धिप्रकाशकम् ॥ १ ॥ गजेन्द्रवदनं नौमि रक्तं विघ्नविदारकम् । पाशाङ्कुशवराभीतिलसद्भुजचतुष्टयम् ॥ २ ॥ भैरवः सर्वदा पातु ऋषिर्मे शिरसोपरि । मुखे छन्दः सदा पातु त्रिष्टुप् च विजयात्मकम् ॥ ३ ॥ गुणत्रयमयी शक्तिः परशक्तिस्तुरीयका । ब्रह्मस्वरूपिणी पातु हृदये मम कालिका ॥ ४ ॥ बीजस्वरूपिणी पातु क्रींकारी शक्तिरूपिणी । हंशक्तिः सर्वदा पातु सर्वरक्षास्वरूपिणी ॥ ५ ॥ महाकालः सदा पातु महाभीमपराक्रमः । ददातु मम कामानि सर्वसिद्धीश्वरो ध्रुवम् ॥ ६ ॥ आदिन्तवर्णपर्यन्ता हृदये मम मातृका । यवान्ता डादिढान्ताश्च रक्षन्तु बाहुयुग्मके ॥ ७ ॥

Schliesst: एकद्विचिविधा देवी कोटिधानन्तरूपिणी । अङ्गाङ्गैर्नामभेदैः कालिकेति प्रगीयते ॥ ४७ ॥ शंभुः पञ्चमुखैरेव गुणान्वक्तुं चमो न ते । चापल्यैर्यत्कृतं सर्वं चमध्वं शुभदा मम ॥ ४८ ॥ प्राणांश्च यशो रच पुत्रदारधन तथा । सर्वकाले सर्वदेशे पाहि दक्षिणकालिके ॥ ४९ ॥ यः संपूज्य पठेद्भक्त्या दिवा वा संध्ययोस्तथा । अवाप्य महतीं प्रज्ञां सर्वकामांस्ततो लभेत् ॥ ५० ॥

1292.

18/9½. 15 Bll., 6 bis 9 Linien. Schrift von 1718.

Mahākālikāsahasranāman, nach dem Kolophon aus dem Kālikākulasarvasva. In 216 Versen. Paginiert 1—20. Foll. 6—10 fehlen. Stimmt mit Nummer 1290, 1 überein. Der Schlussvers 216 ist dort 229.

1293.

18/9. 3 Bll., 11 bis 12 Linien. Geschrieben in Gujarāt von Rūpaśaṅkara um etwa 1780.

Karpūrastava, ein Lobgedicht auf Dakṣiṇakālikā, in 22 Versen. Beginnt: श्रीकालिकायै नमः ॥ कर्पूरं मध्यमान्तःस्वरपररहितं सेन्दुवामाचियुक्तं बीजं ते मातरेतत्त्रिपुरहरवधु चिः कृतं ये जपन्ति । तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्येव वाचः स्वच्छन्दं ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिं गतानाम् ॥ १ ॥ ईशानसेन्दुवामश्रवणपरिगतं बीजमन्यन्महेशि द्वन्द्वं ते मन्दचेता यदि जपति जनो वारमेकं कदाचित् । जित्वा वाचामधीशं धनदमपि चिरं मोहयन्त्यम्बुजाचि वृन्दं चन्द्रार्धचूडे प्रभवति स महाघोरबाणावतंसे ॥ २ ॥

Schliesst: इदं स्तोत्रं मातस्तव मनुसमुद्धारणजनुं स्वरूपाख्यं पादाम्बुजयुगलपूजाविधियुतम् । निशार्धे वा पूजासमयमथवा यस्तु पठति प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ॥ २१ ॥ कुरङ्गाचीवृन्दं तमनुसरति प्रेमतरलं वशस्तस्य चोणीपतिरपि कुबेरप्रतिनिधिः । रिपुः कारागारं कलयति च तत्केलीकलया चिरं जीवन्मुक्तः प्रभवति स भक्तः प्रतिजनुम् ॥ २२ ॥

1294.

15/7. 6 Bll., 7 bis 8 Linien. Etwa 1750.

Karpūrastava. In dieser HS. ist das Gedicht Śyāmāstotra betitelt.

1295.

20/9. 2 Bll., 15 bis 16 Linien. Etwa 1800.

1) *Karpūrastava* in 22 Versen. Hier nach dem Schluss aus dem Dakṣiṇakālītantra.

2) *Dakṣiṇakālikāstava* aus dem Bhairavayāmala. Neun Verse in Vasantatilaka, der zehnte in Śikhariṇī-Metrum. Beginnt क्रीडा-लवेन कलितादिवचःप्रमूतीरोंकारवेदजनदेवगुणान्गृणन्ते । प्रस्थाचर तव मनौ प्रथमे त्रिवीज मन्ये ऽहमम्ब सकलस्य निदानमेतत् ॥ १ ॥ बाहू तवार्थयुगभाग्यभुजौ भजामि यच्चारतः प्रभवति प्रतिपचशान्तिः । यद्धूम्रलोचनवधे प्रथित महद्भिर्व्यासादिभिर्मुनिभिरर्णयुग मनुष्यम् ॥ २ ॥

Schliesst: क्रमेणाय मन्त्रोद्धरणजपहोमादिकलितो भवद्भक्तिश्रद्धास्तिमितहृदयैः साधकवरैः । स्तुतो वा प्रख्यातस्तव जननि नित्य स्तववरो भवेयुस्ते मुख्याः प्रचुरधनिना चापि विदुषाम् ॥ १० ॥

1296.

16/8½. 4 Bll., 9 bis 10 Linien. Geschrieben von Dāmodāra im J. 1655.

Trailokyamaṅgalakavaca, eine Gebetsformel an Kṛṣṇa, aus dem Sanatkumāratantra (Sanatkumārītantra MS.). Beginnt पुलस्त्य उवाच ॥ भगवन्सर्वधर्मज्ञ कवचं यत्प्रकाशितम् । त्रैलोक्यमङ्गलं नाम कृपया कथय प्रभो ॥ सनत्कुमार उवाच ॥ शृणु वक्ष्यामि विप्रेन्द्र कवचं परमाद्भुतम् । नारायणेन कथित कृपया ब्रह्मणे पुरा । ब्रह्मणा कथितं मह्य परं स्नेहाद्ददामि ते ॥ अस्ति गुह्यतमं तत्त्व ब्रह्ममन्त्रौघविग्रहम् । यद्धृत्वा पठनाद्ब्रह्मा सृष्टिं वितनुते ध्रुवम् ॥ यद्धृत्वा पठनात्पाति महालक्ष्मीर्जगत्त्रयम् । पठनाद्धारणाच्छम्भुः संहर्ता सर्वतत्त्ववित् ॥ त्रैलोक्यजननी दुर्गा महिषादिमहासुरान् । वरदृप्ता जघानैव पठनाद्धारणाद्यतः । एवमिन्द्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः ॥ शिष्याय विष्णुभक्ताय साधकाय प्रकाशयेत् । शठाय परशिष्याय दत्त्वा मृत्युमवाप्नुयात् ॥ त्रैलोक्यमङ्गलस्यास्य कवचस्य प्रजापतिः । ऋषिश्छन्दश्च गायत्री देवो नारायणः स्वयम् । धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥ प्रणवो मे शिरः पातु नमो नारायणाय च । भाल पायान्नेत्रयुग्ममष्टार्णो भुक्ति मुक्तिदः । क्लीं पायाच्छ्रोत्रयुग्म चैकाक्षरः सर्वमोहनः ॥ क्लीं कृष्णाय सदा घ्राण गोविन्दायेति जिह्विकाम् । गोपीजनपदवल्लभाय स्वाहानन मम ॥ अष्टादशाक्षरो मन्त्रः कण्ठ पातु दशाक्षरः । गोपीजनपदवल्लभाय स्वाहा भुजद्वयम् ॥ ग्लौं ग्लौं क्लीं श्यामलाङ्गाय नमः स्कन्धौ दशाक्षरः ॥

Schliesst: कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः । त्रैलोक्य क्षोभयत्येव त्रैलोक्यविजयी भवेत् ॥ इद कवचमज्ञात्वा भजेद्यः पुरुषोत्तमम् । शतलक्षप्रजप्तो ऽपि न मन्त्रः सिद्धिदायकः ॥

1297.

19/7. 52 Bll., 5 Linien. Geschrieben von Kāśīnātha im J. 1855.

Gaṇeśakavaca, Verehrung von Gaṇeśa Beginnt: अस्य श्रीवक्रतुण्डषडक्षरमन्त्रस्य भार्गव ऋषिः । अनुष्टुप्छन्दः । वक्रतुण्डो देवता । वं बीजम् । यं शक्तिः । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः । ओं भार्गवऋषये नमः शिरसि । अनुष्टुप्छन्दसे नमो मुखे । वक्रतुण्डाय देवतायै नमो हृदये । वंबीजाय नमो गुह्ये । यंशक्तये नमः पादयोः । इत्यृष्यादिन्यासः । Nach weiteren Formlichkeiten folgt ein Stück aus einem Purāṇa. Dieses beginnt: ऋषिरुवाच ॥ भगवन्कथितः कल्पो मृतसंजीवनस्य च । रुद्राध्यायस्य कृत्स्नस्य फलं चैव महामते ॥ १ ॥ मन्त्राणां युगभेदेन शक्तिभेदेन सुव्रत । इदानीं श्रोतुमिच्छामि मन्त्रराजषडक्षरम् ॥ २ ॥ स्वरूपं साधनं चैव पुरश्चरणमेव च । विनियोगं च सिद्धिं च व्यासशिष्य महामते ॥ ३ ॥ शौनक उवाच ॥ वक्ष्यामि परमं गुह्यं कलौ सिद्धिकरं नृणाम् । वैनायकं महामन्त्रं यथा व्यासमुखाच्छ्रुतम् ॥ ४ ॥ etc. Auf Fol. 24 a beginnt ein Stavarāja, d. i. ein besonderes Loblied auf Gaṇeśa, in 145 Versen: कर्मणा मनसा वाचा ये प्रपन्ना विनायकम् । ते तरन्ति महाघोरं संसारं कामवर्जिताः ॥ १ ॥ एकं विनायकं मुख्यं त्यक्त्वान्यं समुपासते । तेषां सेवाफलं न स्यात्कल्पकोटिशतैरपि ॥ २ ॥ ब्रह्मोवाच ॥ भगवञ्छ्रोतुमिच्छामि विस्तरेण यथातथम् । स्तवराजस्य माहात्म्यं स्वरूपं च विशेषतः ॥ ४ ॥ नन्दिकेश्वर उवाच ॥ स्तवराजस्य माहात्म्यं स्वरूपं च विशेषतः । यत्फलं लभते जप्त्वा स्वरूपमपि यादृशम् ॥ ५ ॥ Vgl. Catalogus Oxon. Num. 78.

1298.

28/9½. 4 Bll., 6 Linien. Etwa 1650.

Gaṇeśamātṛkānyāsa. Nennung des Gaṇeśa und weiblicher Genien, indem, unter Voransetzung der gesammten Buchstaben des Alphabets, mit dem einen oder anderen Finger einzelne Teile des Körpers berührt werden. Fehlerhafte Abschrift. Der Auszug ist genau nach der HS. gegeben. Beginnt: अथ गणेशमातृकान्यासः ॥ अस्य श्रीगणेशमातृकामहामन्त्रस्य गणक ऋषिर्निचृद्गायत्री छन्दः शक्तिविनायको देवता मम सर्वपापशक्त्या दीर्घायया त्वङ्गं कृत्वा ध्यायेद्गजाननम् । यथा । ह्रां हृदयाय नमः । ह्रीं शिरसे स्वाहा । ह्रूं शिखायै वषट् । ह्रैं कवचाय हुं । ह्रौं नेत्रत्रयाय वौषट् । ह्रः अस्त्राय फट् । अथ ध्यानम् । गुणाङ्कुशवराभीतिपाणिं रक्ताब्जहस्तये । प्रिययालिङ्गितं रक्तं त्रिनेत्रं गणपं भजे इति ध्यात्वा ॥ ॐ विघ्नेशह्रीभ्यां

नमो ललाटे । ॐ विघ्नराजश्रीभ्यां नमो मुखवृत्ते । ई विनायकपुष्टिभ्यां नमो दक्षनेत्रे । ई शिवोत्तमशान्तिभ्यां नमो वामनेत्रे । उ विघ्नकृत्स्वस्तिभ्यां नमो दक्षकर्णे । ऊ विनायकशक्तिभ्यां नमो वामकर्णे । ऋ गण[पति]स्वाहाभ्यां नमो दक्षनासारन्ध्रे । ॠ एकदन्तमेधाभ्यां नमो वामनासारन्ध्रे । ऌ त्रिलोचनतेजोवतीभ्यां नमो दक्षगण्डे । ॡ लम्बोदरसत्याभ्यां नमो वामगण्डे ।

1299.

25½/12 1 Bl, 11 Linien Ftwa 1710

Gaṇeśastotra in neun Sragdharā Versen und einem später hinzugefugten zehnten Vers Beginnt द्वे भार्ये सिद्धिबुद्धी तदनु सहचरी ऋद्धिबुद्धी गुणाढ्यौ द्वौ पुत्रौ लक्षलाभौ सुकृतफलमयौ मण्डपे कल्पवृक्षे । गेहे यस्य (MS यक्ष) प्रभूत सद्मनममृत मोदकाः खण्डमिश्रा भूयाद्भूत्यै गणेशो जगदखिलजनानन्दकारी कुटम्बे ॥ १ ॥ ओओओंकाररूप त्वहमिति च पर यत्स्वरूप तृतीय त्रैगुण्यातीतरूप कलयति मनसा तेजसो रूपवर्ति । योगीन्द्रा ब्रह्मरन्ध्रे सकलगुणमय श्रीहरेशस्वसच गगगगगणेश गजमुखमभितो व्यापक चिन्तयन्ति ॥ २ ॥ ववविघ्नराज भजत निजभुजे दक्षिणे न्यस्तशुण्ड क्रक्रक्रकोधमुद्रादलितरिपुकुल कल्पवृक्षस्य मूलम् । ददददन्तमेक दधतमभिमुख कामधेन्वा निषेव्य धंधधधारयन्त धनदमतिशय सिद्धिबुद्धी ददन्तम् ॥ ३ ॥

Schliesst राजानस्तस्य भृत्या इव युवतिकुल दासवत्सर्वदास्ते लक्ष्मीः सर्वाङ्गयुक्ता भजति च सदन किंकराः सर्वलोका' । पुत्राः पौत्राः पवित्रा रणभुवि विजयो द्यूतवादे ऽपि वीरो यस्येशो विघ्नराजो निवसति हृदये भक्तिभाज. सुरेन्द्राः ॥ ९ ॥ अपुत्रो लभते पुत्रान्बद्धो मुच्यते बन्धनात् । त्रिसंध्य च पठेद्यस्तु सर्वसिद्धिमवाप्नुयात् ॥ १० ॥

1300.

22½/12 19 Bll 10 bis 18 Linien Nachlässige Schrift von etwa 1790

Tripurabhairavīpaddhati Dieser Titel ist unsicher und die Blätter sind nicht paginiert Unvollständig Beginnt श्रीमत्त्रिपुरभैरव्यै नमः ॥ अथ त्रिपुरभैरव्याः प्रात.कृत्यादिनित्यार्चनप्रयोगः । तदुक्त रुद्रयामले । प्रात कृत्यमन्तयागे यो देवी भक्तितो ऽर्चयेत् । तस्य पूजा च विफला शौचहीना यथा क्रियाः ॥ १ ॥ ओ तत्र श्रीमान्साधको ऽपररात्रितुर्ययामे विबुधावश्यक कृत्वा शुचिर्धौते नवे वाससी (व्ये वाससि HS) परिधायाचम्य त्रि' प्राणानायम्य देवी नत्वा पञ्चाङ्ग १ भास्म २ मान्त्र ३ मानसं ४ वा स्नान कृत्वा ५ etc

1301.

23/12. 10 Bll., 12 Linien. Etwa 1740.

Caṇḍīvidhāna, die Gebräuche und Gebete, welche beim Lesen von einzelnen Versen und ganzen Kapiteln des Devīmāhātmya angewendet werden. Auch wird die Wirksamkeit von Versen desselben für Erreichung von Wünschen hervorgehoben. Der Verfasser wird nicht genannt. Diese Schrift scheint ein Teil eines grösseren Werkes zu sein. Beginnt: अथ प्रसङ्गात्सप्तशतीस्तोत्रान्तर्गतानां केषांचिन्मन्त्राणां वक्ष्यमाणतन्त्रोक्तफलकाम्यानुष्ठानान्युच्यन्ते । तत्रेत्यादि देशकालौ स्मृत्वामुकगोत्रोत्पन्नस्यामुकशर्मणो ममातिप्रबलवैरिविनाशार्थमेवमुक्त्वेत्यस्य (Mārkaṇḍeyapurāṇa 83, 37) मन्त्रस्यानुष्ठानं करिष्य इति संकल्प्य मूलेन करशुद्धिं व्यापकं च कृत्वा । एवमुक्त्वेत्यस्य ब्रह्मा ऋषिः । गायत्री छन्दः । महाकाली देवता । वैरिनाशार्थे जपे विनियोगः । एवमुक्त्वा समुत्पत्येत्यङ्गुष्ठाभ्या° । etc. Florence MSS. Num. 43.

Die folgenden Tantra werden citiert: Kātyāyanītantra, Kroḍatantra, Gaurītantra, Ḍāmaratantra, Lakṣmītantra, Vārāhītantra. Auf Fol. 5a wird der Keralasampradāya erwähnt.

Schliesst: आश्विनस्य सिते पक्षे आरभ्यामितिथिं सुधीः । अष्टम्यन्तं जपेल्लक्षं दशांशं होममाचरेत् ॥ अन्धकश्च महादैत्यो दुर्गाहोमपरायणः । कवचाकृतिमन्त्रेण महेशेन निपातितः ॥

1302.

23/13. 26 Bll., 12 bis 16 Linien. Geschrieben im J. 1750 von Ratneśvara aus Sinhapura, Sohn von Paṇḍyā Devākara, Sohn von Paṇḍyā Hari, Sohn von Paṇḍyā Harikrisna.

Śatacaṇḍīpaddhati, eine Anleitung zu den Gebräuchen und Gebeten, welche bei der hundertfachen Wiederholung des Caṇḍīpāṭha oder Devīmāhātmya angewendet werden. Beginnt: शतचण्डीविधानेन यथावत्कथयाम्यहम् । सुघोरायामनावृष्ट्यां भूकम्पे च सुदारुणे ॥ १ ॥ परचक्रभये तीव्रे क्षयरोग उपस्थिते । राजवश्यादिकार्येषु आयुष्मत्सुतजन्मनि ॥ २ ॥ महोत्पातविनाशाय पञ्चविंशतियोजने । देशे सर्वत्र शान्त्यर्थं शतचण्डीमिमां जपेत् ॥ ३ ॥ यदि वा जायते वित्तं चित्तं श्रद्धासमन्वितम् । (die zweite Hälfte fehlt, und ist in India Office Num. 2615 von einem Abschreiber willkürlich ergänzt). सन्मासे सत्पक्षे सत्तिथौ सद्दृक्षे सद्योगे शोभने चन्द्रे विष्टिवैधृतिव्यतिपातकुयोगे अमावास्यासत्तिथौ -- रहिते दैवज्ञोदिते आरम्भः कार्यः । तत्र भुवं समां कृत्वा प्राचीसाधनानन्तरं षोडशस्तम्भयुक्तो द्वारशाखातोरणद्वारध्वजपताकादिसंयुक्तो मध्यभागेन वेदा-

कुर्वितो मण्डपः कार्यः । मण्डपरहिते पक्षे चतुरस्रे देव्यागारे देव्याः पीठं कार्यम् । दुर्गागारं प्रकर्तव्यं चतुरस्रं सुशोभनम् । रहस्यस्तम्भिकाढ्यं च चर्चितं चन्द्रशोभितम् ॥ ४ ॥ गोमयेनोपलिप्तं च निम्न्यस्तिसमन्वितम् । तन्मध्ये वेदिकाः कार्याश्चतुर्हस्ताः समाः शुभाः ॥ ५ ॥
Siehe Catal. India Office I I

Schliesst हिमालयादागता देवि होमार्थमिह मण्डपे । होमं गृहीत्वा सद्भक्त्या गच्छ देवि यथासुखम् ॥ अनेन विधिना कुर्याच्छतचण्डीं तु यो नरः । स तु वर्षसहस्राणि स्वर्गलोके महीयते ॥ अपुत्रो लभते॰ ॥ राज्यार्थी लभते राज्यं यशोऽर्थी लभते यशः । मुच्यते सर्वपापेभ्यो लभते परमां गतिम् ॥

1303.

33/10 35 Bl., 9 Linien. Schrift von 1815

Śatacaṇḍīprayoga. Beginnt तत्र यजमानः शिवालयादिषु प्रदेशे यथोक्तं मण्डपं विधाय तन्मध्ये वेदिकां तदैशान्यां यथोक्तं कुण्डं कृत्वा कर्मारम्भात्पूर्वं तदधिकारसिद्ध्यर्थं शक्त्या प्रायश्चित्तं कार्यम् (lies kuryat) । तत्रायं संकल्पः । कुशपाणिः कृत्वा देशकालौ संकीर्त्य मम देहशुद्ध्यर्थं शतचण्डीसंज्ञककर्मण्यधिकारजननार्थममुकप्रत्याम्नायेनेतावत्संख्याभिः प्राजापत्याभिरहं करिष्ये इति संकल्प्य प्राच्योदीच्यामङ्गसहितं प्रायश्चित्तं कुर्यात् । अथ कर्मारम्भदिनकृत्यम् । तत्र पूर्वं प्रातःस्नानादिनित्यक्रियां विधाय पञ्चगव्यातर्पणं कुर्यात् ॥

Schliesst एवं देवीं विसृज्य ततो योगिनीनां महानां स्थापितदेवतानां च विसर्जनं कुर्यात् । भगवधारणम् । कुम्भोदकेन सपरिवारं यजमानमभिषिञ्चेयुः । ततो यजमानः शुक्लाम्बरधरो भूत्वा निमन्त्रितेभ्यो दत्त्वा ब्राह्मणानथ कुमारीश्च भोजयित्वा स्वयं निःसार्य] स्वयं भुक्त्वा स्वात्मानं कृतार्थं मत्वा होमान्यज्ञपतिभ्यो दानानि दत्त्वा यथासुखं विहरेत् ॥

1304.

22/11 8 Bl., 10 bis 11 Linien. [illegible]

Śatacaṇḍīvidhāna in 104 Versen. Beginnt शतचण्डीविधानं तु प्रवक्ष्ये प्रीतये नृणाम् । नृप उपद्रवमापन्ने (Ms. [illegible]) दुर्भिक्षे भूमिकम्पने ॥ १ ॥ अतिवृष्ट्यामनावृष्ट्यां परचक्रभये पथि । राज्यामात्यादिकार्येषु स्वपुरे सुतजन्मनि ॥ २ ॥ महोत्पातप्रनाशाय चरविरतिपोषणे । देशे सर्वत्र शान्त्यर्थं शतचण्डीमिमां चरेत् (Ms. [illegible]) ॥ ३ ॥ सर्वे विप्रा विशन्त्येव शतचण्डीविधौ कृते । रोगाणां

वैरिणां नाशो धनपुत्रसमृद्धयः ॥ ४ ॥ शंकरस्य भवान्या वा प्रासादनिकटे शुभे । शिवाभ्याशे समे देशे चतुर्द्वारोपशोभितम् ॥ ५ ॥ पताकातोरणैर्युक्तं मण्डपं वेदिभूषितम् । तत्र कुण्डं प्रकुर्वीत प्रतीच्यां मध्यतो ऽपि वा ॥ ६ ॥ स्नात्वा नित्यादिकं कृत्वा वृणुयाद्दश वाडवान् । सदाचाराः कुलीना ये ह्रीमन्तः सत्यवादिनः ॥ ७ ॥ चण्डिकापाठसंपूर्णा दयावन्तो जितेन्द्रियाः । व्युत्पन्ना शास्त्रनिष्णाता निजवृत्त्युपजीविनः ॥ ८ ॥ ईदृग्लक्षणसंपूर्णा दम्भमोहविवर्जिताः । दश विप्राः समभ्यर्च्या महालक्ष्मीस्वरूपिणः ॥ ९ ॥

Schliesst: चण्डीसप्तशतीमध्ये संपुटो ऽयमुदाहृतः । सकामः संपुटो जाप्यो निष्कामः संपुटं विना ॥ १०४ ॥ एतद्गोप्यतरं तत्त्वं चण्डिकाजपसिद्धिदम् । न तं विधिं वदेद्दुष्टे खले चौरे गुरुद्रुहि ॥ १०५ ॥ साधौ जितेन्द्रिये दान्ते वदेद्विधिमिमं परम् । एवं सा चण्डिका तुष्टा वक्तृश्रोतॄन्प्रसीदति ॥ १०६ ॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे शतचण्डीविधिः संपूर्णः ॥ Im Mārkaṇḍeyapurāṇa findet sich dieses nicht vor.

Auf Fol. 7b bis 8b findet sich ein neunfacher und fünffacher Anruf an die Göttin. Der erstere beginnt: अथ न्यासविधिः । तत्र भूशुद्धिर्भूतशुद्धिः प्राणप्रतिष्ठा पूर्ववत् । एकादशन्यासेषु मातृकान्यासः ॥

1305.

27/10. 10 Bll., 13 bis 15 Linien. Etwa 1720. Foll. 3b. 4 von einer jüngeren Hand.

Śatacaṇḍīsahasracaṇḍīprayogavidhi von Kamalākara Bhaṭṭa, Sohn von Rāmakrisṇa Bhaṭṭa. Aus seinem Śāntiratna. Beginnt: नत्वा गणेश्वरं देवं पितरौ राघवं शिवम् । रामकृष्णतनूजेन कमलाकरशर्मणा ॥ १ ॥ डामरं यामलं चैव योगिनीतन्त्रमेव च । वाराहीतन्त्रमन्यांश्च ग्रन्थानालोक्य यत्नतः ॥ २ ॥ सहस्रचण्डिकायाश्च शतचण्ड्यास्तथैव च । नवार्णन्यासविधिना प्रयोगः प्रोच्यते ऽधुना ॥ 3 ॥ तत्र यजमानः शुभे देशे मण्डपं चिकीर्षुर्गणेशकूर्मशेषवसुधानां पूजां कृत्वा शतचण्ड्यां षोडशहस्तं सहस्रचण्ड्यां विंशतिहस्तं मण्डपं प्रमाय etc.

Schliesst: इदमेव पूजाहोमबन्ध्यादिविधानं नवरात्रे विज्ञेयम् । विशेषस्तु मत्कृते निर्णयसिन्धौ नवरात्रनिर्णये ज्ञेयः ॥

1306.

26/11. 21 Bll., 10 bis 12 Linien. Geschrieben im J. 1815 von Viṣṇu, Sohn von Devaśarma.

Caṇḍīstotraprayogavidhi, die Anwendung des Devīmāhātmya zu abergläubischen Zwecken, von Nāgojī Bhaṭṭa, Sohn von Śiva

Bhaṭṭa Diese Schrift bildet einen Teil seines Kommentars zum Devīmahatmya Er citiert eine grosse Anzahl von Tantra Beginnt सामविधिब्राह्मणे ऽथ य कामयेत पुनर्न प्रत्याजायेयेमित्यपुनर्भव काममधिकृत्य तदानुसधेयो ऽस्य मन्त्र उक्त. । Samavidh 3 8, 1 2

Schliesst अत्र निष्कदक्षिणाया दरिद्राणा चतु सुवर्णमिति । निष्कस्य दक्षिणासमर्थाना चतु सुवर्णमिति हेमसुवर्णमशीतिगुञ्जामितम् ॥

1307.

20/14 49 Bll 12 Linien Schrift von 1845

Caṇḍīstotraprayogavidhi Die ersten zwei Blätter fehlen Der Inhalt stimmt so weit wie Fol 30 a, 7 mit der vorhergehenden Handschrift bis 17 b 3 überein Von da ab enthält dieses MS bis zu Ende abweichenden Stoff Von den erwähnten Schriften werden nur die folgenden ausgehoben Krodatantra 11 b 12 b Gaṇeśavimarśini 43 a Gavakṣatantra 39 b Ḍamareśvaratantra 18 b Prayogasāra 8 a Bṛhanmatsyasukta 47 b Sagarasamhita 42 b

1308.

$15^1/_2/8^1/_2$ 3 Bll 6 Linien Etwa 1800

Saptaśatikanyasavidhi, die Beruhrung einzelner Körperteile mit bestimmten Fingern nach der Recitation der Saptaśatika oder des Devimāhatmya, und Gebete an Durga Die Handschrift ist am Anfang unvollständig, wie aus den ersten Linien erhellt Beginnt [यै] ओ नमो भगवत्यै श्रीमहाकाल्यै महालक्ष्म्यै महासरस्वत्यै नम समर्पयामीति बुद्ध्या समर्पयेत् ॥ पाठसमाप्तौ पूर्ववन्न्यासादिकं सर्वं विधाय । गुह्यातिगुह्यगोप्त्री त्व गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि । इति मन्त्रेण निवेदयेत् । ततो ऽनुग्रहस्तोत्रं पठेत् । विश्वेश्वरी जगद्धात्री स्थितिसंहारकारिणीम् । करोतु° ॥ १ ॥ स्तुता सुरै. पूर्व । करोतु° ॥ २ ॥ या साम्प्रत । करोतु° ॥ ३ ॥ या च स्मृता । करोतु ॥ ४ ॥*)

Schliesst कामेश्वरि जगन्मात सच्चिदानन्दविग्रहे । गृहाण त्व स्तुतिमिमां प्रसीद परमेश्वरि ॥ ६ ॥ यन्मात्राविन्दुबिन्दुद्वितयपदपदद्वन्द्ववर्णादिहीन भक्त्या भक्त्यानुपूर्वं प्रकृतिगुणवशाद्व्यक्तमव्यक्तमम्ब । मोहादज्ञानतो वा पठितमपठितं साम्प्रत ते स्तवे ऽस्मिंस्तत्सर्वं साङ्गमास्ता भगवति वरदे त्वत्प्रसादात्प्रसीद ॥ ७ ॥ यदत्रपाठे जगदम्बिके मया विसर्गविन्द्वक्षरहीनमीरितम् । तदस्तु संपूर्णतम प्रसादत संकल्पसिद्धिस्तु सदैव जायताम् ॥

*) Diese und die darauf folgenden ahnlichen Verse beziehen sich auf Devīmāhatmya 55, 35 fgg

1309.

20/15. 28 Seiten, 14 bis 18 Linien. Schrift von 1869.

1) Seite 1—13. *Jānakīstavarāja* aus der Agastyasaṃhitā. In 68 Versen. Beginnt: तां ध्याये स्तवराजेन मोक्षरूपां परात्पराम् । आह्लादिनीं हरेः कांचिच्छक्तिं सात्वतसेविताम् ॥ १ ॥ श्रुतिरुवाच ॥ कीदृशः स्तवराजो ऽयं केन प्रोक्तः सुरेश्वर । कथ्यतां कृपया देव जानकीरूपबोधकः ॥ २ ॥ श्रीसंकर्षण उवाच ॥ ब्रवीमि स्तवराजं ते श्रीशिवेन प्रभाषितम् । श्रुतं श्रीवक्त्रतो दिव्यं पावनानां च पावनम् ॥ ३ ॥ Der Hymnus beginnt mit Vers 14: वन्दे विदेहतनयापदपुण्डरीकं कैशोरसौरभसमाहृतयोगिचित्तम् ।

2) Seite 14—28. Gedichte in Hindī, vermischt mit kleinen Bruchstucken in Sanskrit.

1310.

20/15. 13 Bll., 13 bis 14 und 17 bis 20 Linien. Etwa 1760.

Daśavidyānām mantroddhāranyāsāḥ. Die zehn verschiedenen Formen der grossen Göttin werden einzeln in kurzen Formeln angerufen. Darauf folgt die Anlegung (nyāsa) der Finger oder Hände an einzelne Glieder mit Ausstossung von mystischen Silben. Daran schliesst sich eine metrisch abgefasste Betrachtung (dhyāna), in welcher die bestimmte Göttin gepriesen wird. Die zehn Mahāvidyā heissen im Vācaspatya: काली तारा महाविद्या षोडशी भुवनेश्वरी । भैरवी छिन्नमस्ता च विद्या धूमावती तथा । वगला सिद्धविद्या च मातङ्गी कमलात्मिका ॥

Unvollständig. Paginiert 1—13, aber Foll. 9. 11 fehlen. Beginnt: दशविद्यानां मन्त्रोद्धारन्यासा लिख्यन्ते ॥ तत्रादौ महाकाल्याः । क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा । द्वाविंशत्यक्षरो मन्त्रः २२ । भैरव ऋषिः । उष्णिक् छन्दः । काली देवता । ह्रीं बीजम् । हूं शक्तिः । सकलकार्यसिद्ध्यर्थे जपे विनियोगः । इति ऋष्यादिः ॥ अथ न्यासः । क्रीं हृदयाय नमः । क्रीं शिरसे स्वाहा । क्रूं शिखाय वषट् । क्रैं कवचाय हुं । क्रौं नेत्रत्रयाय वौषट् । क्रः अस्त्राय फट् । इति षडङ्गन्यासः । etc.

Tārāmahāvidyā Fol. 2b. Chinnamastāmahāvidyā Fol. 7b. Bālākhyabhairavīmahāvidyā (Bālātripurā, Tripurasundarī) Fol. 8a. Bhuvaneśvarīmahāvidyā Fol. 13a. Dhūmāvatīmahāvidyā Fol. 15a. Bagalāmukhīmahāvidyā Fol. 15a. Mātaṅgīmahāvidyā Fol. 15a.

1311.

19½/11. 12 Bll., 11 bis 13 Linien. Etwa 1810.

Durgāpūjana, Anbetung der Durgā. Paginiert 1—13. Fol. 9 fehlt. Beginnt: तत्र प्रयोगः । अद्येत्यादि ममेहजन्मनि दुर्गा-

प्रीतिद्वारा सर्वापच्छान्तिपूर्वक दीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभाद्यनेकमनोरथावाप्तये शत्रुपराजयवश्यादिचिन्तितार्थसिद्धये शारदनवरात्रप्रतिपदि विहिताङ्कुरार्पणकलशस्थापनयन्त्रपूजनमारम्भनिमित्त महाकालीमहालक्ष्मीमहासरस्वतीप्रीत्यर्थं कलशयन्त्रसवर्णदेवतानामावाहनादिषोडशोपचारैः पूजनमहं करिष्य इति संकल्पः ॥ अथ नियममन्त्र । अद्य स्थित्वा निराहारो भूमिशायी जितेन्द्रियः । नवमे ऽहनि भोक्तव्य शरण परमेश्वरी ॥

Schliesst विन्ध्यस्था विन्ध्यनिलया दिव्यस्थानविलासिनीम् । योगिनीयोगजननी चण्डिका प्रणमाम्यहम् ॥ ईशानमातर देवीमीश्वरीमीश्वरप्रियाम् । प्रणतो ऽस्मि सदा दुर्गा ससारार्णवतारिणीम् ॥ पातय पाताले स्थापय वा सकललोकसाम्राज्ये मातस्तव पदयुगले नाह मुञ्चामि नैव मुञ्चामि ॥ आपदि कि करणीय स्मरणीय चरणयुगलमम्बायाः । तत्स्मरण कि कुरुते ब्रह्मादीनपि किंकरीकुरुते ॥

1312.

23½/9½ 7 Bll, 9 bis 11 Linien Geschrieben von Jagannāthadāsa (Nagarabagoramadhye) im J 1761

Navadurgapūjana, Verehrung der Durgā in ihrer neunfachen Gestalt*) Beginnt श्री नम. । श्रीचण्डिकायै नमः ॥ आदौ स्वस्ति न इन्द्रेति मन्त्रेण यजमानस्य तिलक कर्तव्यम् । अचन्नमीत्यचताः । दधिक्राव्ण इति दधि । काण्डात्काण्डादिति दूर्वा । सुमुखश्चैकदन्तश्च॰ । शुक्लाम्बरधर देवं॰ । लाभस्तेषा॰ । अभीप्सितार्थ॰ । द्यौ. शान्तिः । पवित्रे स्थः । चित्पतिर्मा पुनातु । विश्वानि देव । आयातो । अद्य श्री॰ । अमुकनाम्नि । सवत्सरे । ऋतौ । मासे । पक्षे । तिथौ । वासरे । नवदुर्गासतोषणार्थं षोडशोपचारै. पूजनमहं करिष्ये ॥ अथावाहनम् ॥ जटाजूटसमायुक्तामर्धेन्दुकृतलक्षणाम् । लोचनत्रयसयुक्ता पद्मेन्दुसदृशाननाम् ॥ १ ॥ etc

Die neun Namen der Göttin finden sich in folgenden Versen In anderen Schriften lauten sie verschieden Fol 2a जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि । पूजा गृहाण कौमारि जगन्मातर्नमो ऽस्तु ते ॥ इति चन्दनं समर्पयामि । अनेन प्रतिपदि पूजयेत् ॥ त्रिपुरा त्रिपुराधारा त्रिवर्गज्ञानरूपिणीम् । त्रैलोक्यवन्दितां देवी त्रिमूर्तिं पूजयाम्यहम् ॥ अनेन द्वितीयाया पूजयेत् ॥ कालिका त्रिकलातीता कारुण्यहृदया शिवाम् । कल्याणजननी नित्य कल्याणी पूजयाम्यहम् ॥

*) Durga wird zur Bezeichnung von neun verwendet

अनेन तृतीयायां पूजयेत् ॥ अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम् । अनन्तशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम् । अनेन चतुर्थ्यां पूजयेत् ॥ An den folgenden fünf Tagen wird sie als Kālikā, Caṇḍikā, Śāmbhavī, Durgā, Subhadrā angerufen.

An diesen Kultus schliesst sich die Erwähnung eines königlichen Kriegszugs, in welcher die verschiedenen Waffen und anderes Zubehör angebetet werden. Fol. 3b: ततः शस्त्रपूजा । अथेत्यादि । राज्ञां दशदिग्विजयार्थं सर्वशत्रुजयार्थं सर्वायुधानां पूजनमहं करिष्ये ॥ पूजयेद्राजचिह्नानि फलमाल्यविलेपनैः । तस्याभिसरणाद्राज्ञो विजयः समुदाहृतः ॥ १ ॥ पूजामन्त्रान्प्रवक्ष्यामि पुराणोक्तानहं तव । पूजितानि प्रयच्छन्ति कीर्तिमायुर्यशो बलम् ॥ २ ॥ अथ मन्त्राः (diese folgen später) ॥ अथ छत्रपूजा ॥ यथाम्बुदाश्छादयन्ति शिवायेमां वसुंधराम् । तथा छादय राजानं विजयारोग्यवृद्धये ॥ ३ ॥ Dieser Teil schliesst: इति विजयदशमीव्रते राज्ञां सर्वायुधछत्रचामरवाहनपूजाध्यायः ॥ etc.

1313.

24½/12½. 6 Bll., 9 bis 10 Linien. Etwa 1810.

Navārṇamantra, die Anrufung von Durgā in neun Silben. Aller Wahrscheinlichkeit nach werden die in dieser Schrift angegebenen Gebete bei der Recitation des Devīmāhātmya gebraucht. Beginnt: आचम्य प्राणायामं [कृत्वा] ओं अस्य श्रीनवार्ण(व)मन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः । गायत्र्युष्णिगनुष्टुप्छन्दांसि । महाकालीमहालक्ष्मीमहासरस्वत्यो देवताः । नन्दाशाकम्भरीभीमाः शक्तयः । रक्तदन्तिकादुर्गाभ्रामर्यो बीजानि । अग्निवायुसूर्यास्तत्त्वानि । मम (वा) यजमानस्य सर्वाभीष्टसिद्ध्यर्थे नवार्णमन्त्रजपे विनियोगः ॥

Navārṇanyāsa endet Fol. 2a. Darauf folgt Saptaśatikānyāsavidhi. Auf Fol. 2b 2 heisst es: ओं सावर्णिः सूर्यतनय इत्यारभ्य ओं सावर्णिर्भविता मनुरितिपर्यन्तं रात्रिसूक्तादिदेवीसूक्तान्तं नवार्णसंपुटितं । सप्तशतीपाठे विनियोगः ॥ Rātrīsūkta endet Fol. 4a 4, Bhavatyanugrahastavarāja Fol. 5a 8. Darauf folgt Devīkṣamāpaṇa Fol. 6a 1.

Der Schlüssel des Ganzen findet sich in den Schlussversen: त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव । शिवं कुरुष्व मे देवि यशो वीर्यं च सर्वदा ॥ १ ॥ माले माले महामाये सर्वशक्तिस्वरूपिणी । चतुर्वर्गस्त्वयि न्यस्त तस्मान्मे सिद्धिदा भवेः ॥ २ ॥ वाग्बीजमादिम्दुसमानदीप्तं मायार्कतेजोद्युतिमद्वितीयम् । कामं च

